# अलंकारशास्त्रदृष्ट्या रससंख्याविवेचनम् - एका समीक्षा

कांचन बारीक

सारवस्तु :

आचार्यभरतस्य कालादेव स्वीकृतेनाष्टरसवादेन सह शान्तरसं संयुज्य नवमरसवादस्य मान्यताप्रदानं प्रारब्धमासीत्। कालान्तरे दशमत्वेन वात्सल्यस्य चर्चायामपि भक्तिरसस्य अधिकरूपेण स्वीकृतिरस्ति। शृङ्गार-रौद्र-बीभत्सरसान् उत्पादकत्वेन नाम मूलरसरूपेण तथा हास्य-करुण-अद्भुत-भयानकरसान् उत्पाद्यरसत्वेन आचार्यभरतः अभिहितवान्। शारदातनयः भरतोक्तमूलरसवादस्य धारणां प्रत्याखातवान्। अनन्तरम् भानुदत्तः रसतरङ्गिन्यां लौकिकालौकिकरूपेण रस्य भेदद्वयमङ्गीकृतवान्। ततःपरं विविधालंकारिणां मतं पर्यालोच्य इदं वक्तुं शक्यते यत् रसः मुख्यतया द्विविधः, तत्र प्रथमः शृङ्गाररूपः लौकिकः, द्वितीयस्तु भक्तिरूपः अलौकिकः। प्रथममूले लौकिका रीतिः, द्वितीयमूले देवादिविषयकरतिः। साहित्येउच्चकोटिकयोः उभयविधयोः रत्योः विशेषप्रभावः परिलक्षितः।

सूचकशब्दाः

अलौकिकम्, उत्पाद्यम्, उत्पादकं, दशरसवादः, नवमरसवादः, लौकिकम्।

## मूलप्रबन्धः

रसोपलब्धग्रन्थमाश्रित्यैव रससिद्धान्तस्य प्रवर्तकः आचार्यभरतमुनिः अभिधीयते। किन्तु भरतमुनिकृतनाट्यशास्त्राद् तथा इतररसविषयकग्रन्थेभ्यः इदं ज्ञातं यत् भरतमुनेः प्राग् एव रसस्य विकाशः विचकाशे। सदाशिव-ब्रह्म-तन्डु-वासुकि-नारद-वृद्धभरत-आदिभरत-सौद्धोदनि-शिलालिन-नन्दि-नन्दिकेश्वर-द्रुहिण-कोहलादयः भरतमुनेः पूर्वाचार्याः आसन्।[१]एते रससिद्धन्तविषये पर्याप्तं चिन्तनं लेखनं चक्रुः। एतैः अनुप्राणितः सन् भरतमुनिः नाट्यशास्त्रे उपरोक्तानामाचार्याणां नामानि प्रोल्लिखितवान्। राजशेखर—शारदातनय-केशवप्रसादमिश्रादीनां ग्रन्थे

अपि पूर्वाचार्याणां नामानि समुपलभ्यन्ते। अनेन इदं स्पष्टं भवति यत् भरतकालाद् प्रागेव रससिद्धान्तस्य मान्यता आसीत्। आचार्यभरतकालाद् प्राग् रससंख्याविषये पूर्वाचार्याः अशमन्। रससंख्यानिर्वचने भरताचार्यः द्रुहीनाचार्यस्य मतमुल्लिखितवान्। भरताचार्यः अष्टौ रसान् अङ्गीकृतवन्तः, यथा – शृङ्गाररसः, हास्यरसः, करुणरसः, रौद्ररसः, वीररसः, भयानकरसः, बीभत्सरसः, अद्भूतरसः चेति। एवंरूपेण पूर्वाचार्याः अपि अष्टौ रसान् अङ्गीचकार। पूर्वाचार्यः शारदातनयः भावप्रकाशनाख्ये ग्रन्थे बहुविधान् रससम्प्रदायान् उल्लिलेख। तेषु द्वे विशिष्टरूपे गुरुपरम्परे वर्तेते। प्रथमपरम्परायां शिव-नन्दिन-वैवस्वत-पदम्भुवाः(द्रुहिनः ब्रह्मा वेति) तथा द्वितीयगुरुपरम्परायां वासुकि-नारद-व्यास-वाल्मिक्यादिमुनयः प्रमुखा आसन्। प्रथमगुरुपरम्परायां अष्टौ रसाः तथा द्वितीयगुरुपरम्परायां नव रसाः स्वीकृताः सन्ति। भरताचार्यः द्वितीयगुरुपरम्परान्तर्गतः इति शारदातनयमतं, नेदं युक्तियुक्तम्। यदि भरतमुनिः द्वितीयपरम्परया युक्तः स्यात् तदा तस्य ग्रन्थे अष्टस्थाने नवानां रसानामङ्कीकारो भवेत्। शारदातनयः स्वयमेव प्रथमगुरुपरम्परायामासीत्, तस्य भावप्रकाशनाख्ये ग्रन्थे अष्टौ रसाः अङ्गीकृताः आसन्। एवंरूपेण भरतकाले तत्प्रागकाले च अष्टौ नाट्यरसाः आसन्। तेन स्वीकृताः अष्टौ रराः, यथा - शृङ्गाररसः, हास्यरसः, करुणरसः, रौद्ररसः, वीररसः, भयानकरसः, बीभत्सरसः, अद्भूतरसः चेति। एते रसाः महात्मना द्रुहिणेन अपि स्वीकृताः। इदं स्पष्टं यत् भरतेन तत्पूर्वाचार्यैः अष्टौ रसाः संभेजिरे। इयम् अष्टरसवादपरम्परा आचार्यदण्डीपर्यन्तं यथायथमासीत्। रसवदलंकारप्रसङ्गे आचार्यदण्डी स्पष्टतया अष्टानां रसानाम् उल्लेखनं कृतवान्। एतस्य पूर्वाचार्ये भामहे काव्यालंकारग्रन्थे प्रेयस-रसवदूर्जस्वीति अलंकाराणां चर्चा विहिता। प्रकारान्तरे "रसैश्च सकलैः पृथक्"[२] इत्यनया उक्त्या रससंख्याविषये अस्पष्टरूपेण अनुल्लिख्य "शृङ्गारादिरसः यथा"[३] इति उक्त्वा रसस्य बहुरूपत्वं संकेतितवान्। दण्डिनः अनन्तरम् आलंकारिकरूपेण सर्वादौ उद्भटः नवरसान् प्रतिष्ठापितवान्। तेन विरचिते काव्यलंकारसारसंग्रहाख्यग्रन्थस्य चतुर्थवर्गे "रसवद् अलंकारः" इत्यस्य चर्चाकाले भरतोक्तैः अष्टभिः रसैः शान्तरसं संयुज्य नवरसान् प्रतिपादितवान्।

"शृङ्गारहास्यकरुणरौद्रवीरभयानकाः।

बीभत्साद्भुतशान्ताश्च नाट्ये नवरसाः स्मृताः॥"[४]

उद्भटः सर्वप्रथमं शान्तरसस्य उल्लेखनं चकार इति तु विशेषविषयः। अतः उद्भटः एव शान्तरसस्य प्रवर्तकः इति अभिहितः। किन्तु काव्यालंकारसारसंग्रहग्रन्थे शान्तरसस्य सस्पष्टतां पुष्टतां च दृष्ट्वा इदमनुमातं शक्यते यत् उद्भटाद् प्रागेव काव्ये शान्तरसः अवर्तत। अनेन इदं स्पष्टी भवति यत् उद्भटसमये नवरसानां प्रचलनमासीत्। एवंप्रकारेण परम्पराप्रवाहेण नवरसानां प्रसिद्धिर्जाता तथैव च रससंख्यावृद्धिसंकोचनयोः निरन्तरप्रयत्नः अवलोकितः। आचार्यवामनः अर्थगुणात्मककान्तिविवेचनप्रसङ्ग रसदीप्तिचर्चा विहितवान्, किन्तु रससंख्याविषये मौनत्वं प्रदर्शितवान्। तस्य श्रृङ्गारादयः इति ग्रन्थं परिशील्य इदं वक्तुं शक्यते यत् रसभेदविषये सः अवगतः आसीत्। उद्भटानन्तरम् आचार्यरुद्रटः रससंख्यां विवर्धितवान्। श्रृङ्गारारभ्यशान्तपर्यन्तं ये नव रसाः वर्तन्ते, तैः सह प्रेयाणः इति आख्यात्मकं नूतनरसं संयुज्य दश रसान् स्वीकृतवान्। एवञ्च स्वकीये ग्रन्थे स्नेहस्थायिभावात्मकं श्रेयान इति नूतनरसमुद्घोषितवान्। अन्यत्र इदमभिव्यक्तं यत् आनन्ददायकत्वादेव एते रसाः। रससंख्याविमर्शवेलायां रुद्रटः महत्युपलब्ध्या प्रेयानरसस्य व्याख्यानपुरस्सरं दशरसवादं प्रतिष्ठापितवान्। किन्तु तस्य उत्तरकालिकाः आचार्यः रुद्रभट्टः श्रृङ्गारतिलके दशरसवादं खण्डितवान्। रुद्रभट्टानुसारं काव्ये श्रृङ्गारादिनवरसानां मान्यता प्रदातव्या।

"श्रृङ्गारहास्यकरुणरौद्रवीरभयानकाः।
बीभत्साद्भुतशान्ताश्च नाट्ये नवरसाः स्मृताः॥"[५]

यद्यपि नवरसवादस्यसमर्थनं कृतवान् तथापि सर्वभावरसवादमङ्गीकृतवान्। रुद्रभट्टः नवानां स्थायीभावानां, त्रयस्त्रिंशत्सञ्चारीभावानां, अष्टानां सात्त्विकभावानां समुल्लेखपूर्वकं प्रोक्तवान् यत् यथा विविधानि द्रव्याणि मधुरादेः रसात्मकतां प्राप्नुवन्ति तथैव सर्वे भावाः सम्यग्रूपेण रसात्मकतां लभन्ते।

एवंरूपेण रुद्रभट्टः संभजति यत् यः कोऽपिभावः परिपुष्टः सन् रसदशामाप्नुयात्। रुद्रभट्टः पूर्वाचार्यस्य रुद्रटस्य दशवादमस्वीक्रियते चेदपि पक्षान्तरे सर्वभावरसवादेन तदङ्गीचकार। ईदृशी स्थितिः अत्यन्तं विषङ्गतिपूर्वा। रुद्रभट्टः नवरसवादस्य समर्थनञ्चकार इति प्रतिभाति किन्तु तस्य मौलिकानुभूत्या

सर्वभावरसवादसमर्थनमेव प्रकाश्यते। ध्वनिकारः आनन्दवर्धनः रससंख्याविषये सुस्पष्टं मतं नोपस्थापितवान्। ध्वन्यालोकस्य क्वचित् स्थानविशेषे नवरसं प्रोल्लिखितिवान्। अनेन अनुमातुं शक्यते यत् सः नवरसत्वमङ्गीचकार। तथापि रुद्रभट्टसदृशः प्रसङ्गानुसारं वर्णस्य रसद्योतकता, औचित्यावश्यकता, रसविरोधाविरोधौ तत्परिहारश्च, रसस्य अङ्गाङ्गिभावः इति विषयानामालोनचनं कृत्वा परोक्षरूपेण रसाननन्तवादं समर्थितवान्। आनन्दवर्धनानन्तरकालिक आचार्यः मुकुलभट्टः अभिधावृत्तिमातृकाख्ये ग्रन्थे रससंख्यां विचारितवान्। तेन अभिधालक्षणयोः विवेचनं कृतम्। आचार्यभट्टनायकस्य हृदयदर्पणं तथा भट्टतौतस्य काव्यकौतुमिति ग्रन्थद्वयमधुना न समुपलभ्यते अतः तेषां रससंख्याविमर्शः नावगन्तुं शक्यते। अभिनवभारत्यां तथा ध्वन्यालोकस्य लोचनटीकायां नवरसवादस्य सुस्पष्टता अस्ति।[६] अभिनवगुप्तस्य पूर्वाचार्यः प्रतिहारेन्दुराजः शृङ्गाराारभ्यशान्तपर्यन्तं नवरसवादं स्वीकृत्य रुद्रटप्रणीतसर्वभावरसवादं संबभाज।[७]अभिनवगुप्ताचार्यः अभिनवभारतीति ग्रन्थे रसभेदसमस्यां सयुक्तिकंविचारितवान्। पारमार्थिकदृष्ट्या आनन्दमयज्ञानरूपात्मनः आस्वादनत्वेन रसमङ्गीचकार। तन्मते रसस्य बहुरूपकल्पनमनावश्यकम्। अनुभूतेः गहनभावे आनन्दात्मकः एकोऽयं रसः। आस्वादत्वात् आनन्दरूपत्वात् रसः एकविधः। अस्य भेदः न सम्भवति। अभिनवभारतीग्रन्थस्य बहुषु स्थलेषु इदं प्रतिपादितं यत् अभिनवगुप्तः साधारणीकरणसन्दर्भे नवरसवादं स्वीकृतवान्। अभिनवगुप्ताचार्यः शृङ्गारादीनामष्टरसानां निरूपणावसरे मौलिकदृष्ट्या शान्तरसातिरिक्तं नवीनरसं न समर्थितवान्। पारमार्थिकतया रसस्तु एक एव, व्यवहारिकदृष्ट्या नवविधः इति। आचार्यराजशेखरकृते काव्यमीमांसाग्रन्थे प्राचार्यस्य नन्दीकेश्वरस्य समुपवर्णनं लभ्यते। राजशेखरोऽपि नवरसवादमङ्गीचकार इति डः वि. राघवनाचार्यस्य अभिमतम्। आचार्यधनञ्जयः दशरूपके रतिः, उत्साहः, जुगुप्सा, क्रोधः, हासः, विस्मयः, भयः, शोकः इति अष्टभिः स्थायीभावैः सह अष्टौ रसान् स्वीकृतवान्।

"रत्युत्साहः जुगुप्साः क्रोधो हासः स्मयो भयं शोकः।
शममपि केचिद् प्राहुः पुष्टिर्नाट्येषु नैतस्य" ॥[८]

उपरोक्तश्लोके शमोल्लेखनात् इदं प्रतीयते यत् धनञ्जयः परोक्षरूपेण शान्तरसं

स्वीकृतवान्। 'केचिद् प्राहुः' इत्यंशं दृष्ट्वा वक्तुं शक्यते यत् धनञ्जयः स्वयमेव शान्तरसस्य स्थायीभावत्वेन शमं नाङ्गीचकार। किन्तु अन्येषामाचार्याणामभिमतं समर्थयन् परोक्षरूपेण शान्तरसम्अनुमोदितवान्। यद्यपि दशरूपकस्य आलोच्य विषयः रूपकम्। अतः शान्तरसपर्यालोचनं तत्र व्यर्थमेव भाति। तेन शान्तरसस्य प्रत्यक्षस्वीकृतिः न प्रदत्ता, कदाचित् काव्ये तदुल्लेखनं तम्। एवंरूपेम नाट्यविषयिणि दशरूपके शान्तरसस्य स्थायीभावस्य शमस्य परोक्षमान्यता वर्तते। धनञ्जयानन्तराचार्यरूपेम कुन्तकस्य नाम प्रसिद्धमस्ति। वक्रोतजीविते रामायणमहाभारतप्रासङ्गिकस्य शान्तरसस्य मान्यतां प्रदत्तवान्। अनेन इदं स्पष्टं यत् नवरसवादे सः प्रत्येता आसीत्। क्षेमेन्द्राचार्यः औचित्यविचारचर्चायां रसौचित्यप्रसङ्गे शृङ्गारादिनवरसानामुल्लेखनं कृतवान्। अनेन तस्य नवरसवादित्वं प्रमाणितं भवति। आचार्यभोजस्य सरस्वतीकण्ठाभरणे तथा शृङ्गारप्रकाशे रससंख्या विस्ताररूपेण वर्णितास्ति। प्रथितान् नवरसान् अतिरिच्य नूतनानां रसानां नामोल्लेखनं चकार। किन्तु भोजेन कियान् संख्यकान् रसान् अङ्गीकृतवान् इति विषयोऽयं विवादमूलकोऽस्ति। सः सरस्वतीकण्ठाभरणस्य पञ्चमपरिच्छेदे नवरसान् अतिरिच्य उद्धत-प्रेयस-उदात्त-स्वातन्त्र्य-आनन्दप्रशम-पारवश्य-साध्वस-विलास-अनुराग-सङ्गम-निर्वेद-रति-अमर्ष-विषाद्-जुगुप्सा-उत्कर्ष-हर्ष-धृति-उत्कण्ठा-आवेग-विस्मय-मति-वितर्क-चिन्ता-चपलता-हास-उत्साह-स्तम्भ-गद्गद-उन्माद-क्रीडा-अवहित्था-भय-शङ्कादीनां रसानां प्रोल्लेखनम् अकरोत्। सर्वभावरसवादसम्बन्धितानाम् एकोनपञ्चाशद्रसानां भेदस्वीकरणं तु नासमीचीनं भवेत्। भोजेन न केवलम् एतेषां भावानां रसरूपता उल्लिखिता अपितु बहूनां नूतनानां रसानां चर्चा अपि विहिता। मनसि बहवः भावाः उद्भवन्तीति आधुनिकमनोविज्ञाने अनुमोदितमस्ति। अतः एतेषां सर्वेषां भावानां गणना तु न सम्भवति। एतद्दृष्ट्या भोजसमर्थिता रससंख्या अनन्ता। भट्टलोल्लट-रुद्रट-नमिसाध्वादयः इति पूर्वाचार्याः अपि तन्मतमनुसृतवन्तः। एवंरूपेण भोजमतानुसारं रससंख्या अपरिमिता इति सिद्धम्। अग्निपुराणे मुख्यतया तु शृङ्गाररसस्य एव स्वीकृतिरस्ति। अभिनयादिनिरूपणावसरे शृङ्गार-हास्य-करुण-रौद्र-वीर-बीभत्सरसरूपेण रसोपभेदः परिलक्ष्यते। शृङ्गार-रौद्र-वीर-बीभत्साः इति चत्वारः

उत्पादकरसाः,हास्य-करुण-अद्भुत-भयानकाः इति उत्पाद्यरसाः। एतैः सह शान्तरसस्य संयोजनेन नवरसवादस्य संकेतः उपलभ्यते। किन्तु प्रामाणिकतया शान्तरसमतिरिक्तम् आचार्यमहिमभट्टः नवरसवादमङ्गीचकार, तथैव मम्मटाचार्योऽपि। आचार्यहेमचन्द्रः स्वकीये काव्यानुशासनग्रन्थे नवरसवादं समर्थितवान। आचार्यरामचन्द्रगुणाचन्द्रौ नाट्यदर्पणे करुण-रौद्र-भयानक-बीभत्सरसान् दुःखात्मकेन तथा शृङ्गार-हास्य-वीर-अद्भुत-शान्तरसान् सुखात्मकरूपेण अङ्गीकृतवन्तौ। शारदातनयः भावप्रकाशने अष्टरसवादस्य समर्थनं चकार। पृथग्रूपेण शान्तरसस्य चर्चा अपि तेन विहिता। वागभट्टोऽपि वागभट्टालंकारग्रन्थे प्रथितान् नवरसान् वर्णितवान्। शार्ङ्गदेव सङ्गीतरत्नाकरे नवरसवादं समर्थितवान। युगेऽस्मिन् सागरनन्दी-जयदेव-अमरचन्द्र-विद्याधर-देवेश्वर-विद्यानाथादयः आचार्याः रसविमर्शनं तु चक्रुः किन्तु रससंख्याविषये तेषामभिमतं सुस्पष्टतया न प्राप्तम्।

चतुर्दशशतके आचार्यविश्वनाथः परम्परानुमोदितैः शृङ्गारादिनवरसैः सह वात्सल्यं संयुज्य दशरसवादं समनुमोदितवान्। भानुदत्तकृतायां रसतरङ्गिन्यां नाट्यसन्दर्भे भरतसम्मताः अष्टौ रसाः समनुज्ञाताः। किन्तु काव्ये नवमरसत्वेन शान्तरसः स्वीकृतोऽस्ति। मायारसविमर्शनहेतुत्वात् भानुदत्तः दशरसवादी इति कीर्तियुतः। प्रत्याखानार्थं तेन वात्सल्य-लौल्य-भक्ति-कार्पण्यरसानां चर्चा विहिता। किन्तु करुणशान्तहास्यरसाणां व्यभिचारित्वेन एते प्रोक्ताः रसाः गृहीताः। मुख्यतया सः अष्टवादी आसीत्।

"शृङ्गारहास्यकरुणारौद्रवीरभयानकाः।
बीभत्साद्भुतसंज्ञौ च नाट्ये चाष्टौ रसाः स्मृताः"॥[९]

आधुनिकालंकारिकाणां मध्ये मधुसूदनसरस्वती-रूपगोस्वामी-जीवगोस्वामी-कविकर्णपूरादयः वैष्णवाः भक्तिरसं प्रतिष्ठापयन्तः रससंख्यां विवर्धितवन्तः। रूपगोस्वामी हरिभक्तिरसामृतसिन्धुः इति ग्रन्थे शान्त-प्रीति-प्रेयान-वत्सल-मधुररसान् भक्तिरसे तथा हास्य-अद्भूत-वीर-करुण-रौद्र-भयानक-बीभत्सरसान् गौणभक्तिरसे उपाददात्। कविकर्णपूरः शृङ्गारादिशान्तपर्यन्तं नवरसपुरस्सरं मायाचर्चां विधाय रससंख्यामवर्धयत्। केशवमिश्रः तस्य

अलंकारशेखरे नवरसवादे सम्मतिं प्रदर्शितवान्, तथैव पण्डितराजजगन्नाथोऽपि। संस्कृतकाव्यशास्त्रीयपरम्परायाः अन्तिममान्याचार्याः विश्वेश्वरः रसचन्द्रिकायां नवरसवादमङ्गीकृतवान्। एवंरूपेण इदं प्रमाणीयते यत् अधिकाः आचार्याः नवरसवादं समर्थिवन्तः। अव्यवस्थायाः अनवस्थायाः च स्वात्मानं त्रातुं सर्वे परम्परापालने पक्षपातित्वं चक्रुः। ते नाट्यप्रसङ्गे अष्टरसवादं तथा काव्यप्रसङ्गे नवरसवादं समर्थितवन्तः। तथैव ते स्वपरम्परामपि अपिपरुः। एवंरूपेण नवरसवादधारणा सुस्पष्टा चेदपि दशरसवादविषये सुदृढः मतवादः न समुपलभ्यते।[१०]दशरसवादविषये बहुविधानि अभिमतानि प्रचलितानि सन्ति। केचन तु महारसं नाम हरिरसमाश्रित्यैव भक्तिरसे अधिकं प्राधान्यं प्रदत्तवन्तः। किन्तु रससंख्या विषये तेषामभिमतमेव नास्ति। साधनाजनितानन्दे एव तेषामभिरुचिः आसीत्। भक्तिशान्तश्रृङ्गाररसानां संयोगेन महारसमुत्पाद्य ते दशरसवादमभिहितवन्तः। नाट्यशास्त्रपरम्परायां तु नाट्यसन्दर्भे श्रृङ्गार-हास्य-करुण-रौद्र-वीर-भयानक-बीभत्स-अद्भूतरसान् आदाय आहत्य अष्टरसानां प्रतिष्ठापनं सञ्जातम्। नवमरसत्वेन शान्तरसस्य ग्रहणं भरतेन विहितमुत न इत्यस्मिन् विषये पण्डितेषु मतभेदः परिलक्ष्यते। केचित् तु भरतनाट्यशास्त्रे अष्टौ रसाः इति कथयन्ति। अतः तन्मते शान्तरसः स्थानं न अवाप्नोत्। भरताचार्यः शान्तरसं संस्थाप्य नवरसस्थले शान्तरस्य वर्णनं कर्तुं शक्नुयात् किन्तु तेन तन्न कृतम्। अतः अनेनैव प्रमाणं भवति यत् सः अष्टरसवादी आसीत्। भरतोत्तरकाले विवादिते नवरसस्थाने शान्तरसः संस्थापितः। विशेषतया उद्भटाचार्यः अग्रगण्यः आसीत्। अभिनवगुप्तस्याभिमतमङ्गीकृत्यैव नवरसत्वेन शान्तरसः स्थानमाप्नोत्। स्वतन्त्ररसरूपेण शान्तरसः अङ्गीकर्तव्यः। यतोहि पुरुषार्थोपयोगितादृष्ट्या शान्तरसः इतरापेक्षया उत्कृष्टः। परमपुरुषार्थेन मोक्षेन सह अस्य सम्बन्धः वर्तते। शान्तरसत्वमपि सन्दिग्धमस्पि। न केवलं काव्ये अन्यरसवत् काव्ये अपि अस्य प्रयोजनत्वं वर्तेत। कालान्तरे दशरसवादमाश्रित्यैव पण्डितवर्गेषु मतभेदः परिलक्षितः। दशमरसस्थाने विविधैः पण्डितैः विविधानि नामानि उद्धृतानि। आचार्यरुद्रटमते प्रेयाणः दशमरसः। तन्मते –

"श्रृङ्गारवीरकरुणाबीभत्सभयानकाद्भूता हास्यः रौद्रः शान्तः प्रेयानिति मन्त्वायः

रसाः सर्वे॥"[11]

रुद्रटोत्तरकालिकाः भामह-दण्डी-उद्भटादयः आचार्याः आलंकारिकाः प्रेयानरसं प्रेयस्वदालंकारे निहितवन्तः।

प्रेयस्तु भक्तिरसतुल्यः इति दण्डीभामहौ अभिहितवन्तौ। किन्तु उद्भटः रसमेनं काव्ये अन्तर्भावयन् वात्सल्यभावं चर्चितवान्। रुद्रटः भक्तिवात्सल्यरसयोः भिन्नरूपत्वेन सुहृदभावेन सह संयुज्य प्रस्तुतवान्। दशमरसत्वेन वात्सल्यरसस्य स्वीकृतिः सर्वादौ विश्वनाथेन साहित्यदर्पणे चकार –

"स्फुटं चमत्कारितया वात्सलं च रसं विदुः"।[12]

तेनैव रसोऽयं स्वीकृतः। दण्डीभामहौ प्रेयसालंकारस्य विवेचनं कृत्वा वात्सल्यरसमभिहितवन्तौ। दशमरसवादेषु अन्तर्गतः भक्तिरसः सर्वाधिकरूपेण गृहीतः। भक्तिरसस्य बीजत्वं तु सर्वप्रथमं भामहेन अलंकारोदाहरणे उपन्यस्तम् –

"प्रेयो गृहागतं कृष्णमवादीद्विदुरा यथा।
अद्य या मम गोविन्द जाता त्वयि गृहागत॥
कालेनैषा भवेत् प्रीतिः तवैवा गमनात् पुनः॥"[13]

दण्डी-उद्भट-रुद्रटादयः आचार्याः भक्तिचर्चां कृतवन्तः। किन्तु तेषामभिमतम् अभिनवगुप्तेन नाङ्गीकृतम्। शान्तरसे एव भक्तेः अन्तर्भावः इति तन्मतम्। धनञ्जयकृते दशरूपके, हेमचन्द्रकृते अलंकारचूडामणौ, शार्ङ्गदेवकृते सङ्गीतरत्नाकरे अभिनवगुप्ताभिमतमेव अनुसृतमस्ति। किन्तु कालान्तरे मम्मटाचार्यः भावध्वनौ एव देवादिविषयकरतिमङ्गीकृतवान्। विश्वनाथाचार्य-जगन्नाथौ च प्रमुखौ आलंकारिकौ इमां भक्तिं नाङ्गीकृतवन्तौ। किन्तु तौ भावत्वेन इमां स्वीकृवन्तौ। एवमुपायेन अलंकारशास्त्रे भावरूपेण भक्तेः प्रतिष्ठा जाता। अन्यत्र बोपदेव-हेमाद्रि-मधुसूदनसरस्वती-रूपगोस्वामी-जीवगोस्वामी-कविकर्णपूरादयः प्रमुखाः आचार्याः शास्त्रीयाधारदानमाध्यमेन एनं भक्तिं दशमरसरूपेण प्रतिष्ठापितवन्तः। मधुसूदनसरस्वत्याः संरचनेन भगवद्भक्तिरसायने भक्तिरसः विशेषरूपेण प्रतिष्ठः जातः। तथापि भक्तिरसोऽयं स्वतन्त्ररूपेण सर्वमान्यः उत न तद्विषये जिज्ञासास्ति। किन्तु एतद्वक्तुं शक्यते यत् हिन्दीकाव्यशास्त्रे भक्तिरसः व्यापकरूपेण समर्थितः। आनन्दप्रकाशदीक्षितादयः कवयः व्यवहारिकरूपेण भक्तिकालीनकाव्येषु एनं

स्वतन्त्ररसम् अनुमोदितवन्तः। पुनः केचित् मराठिसाहित्यिकाः शृङ्गाररसान्तर्गतोऽयं भक्तिरसः इति विचिन्तयन्ति। अधुना प्रश्नः उदेति यत् भक्तिरसः शृङ्गारान्तर्गतः भवेदुत न ? वस्तुतः भक्तिरसान्तर्गतोऽयं मधुररसः भगवद्विषयकपरमोत्कर्षरूपश्चेदपि लौकिकविषये तस्य उत्कर्षता न्यूना भवति। पारमार्थिकतयाशृङ्गार-भगवतरतयोः मध्ये महान् भेदो वर्तते। प्रथमा तु लोकासक्तिहेतुस्वरूपा, द्वितीया लोकासक्तेः विमर्षहेतुस्वरूपा। योगिपुरुषेषु यः भेदः मुख्यतया शृङ्गारविरोधी तथा अयमेव भगवत्याः मुख्यभेदः। अतः शास्त्रीयदृष्ट्या मनोवैज्ञानिकदृष्ट्या विचार्यते चेत् इदमुच्यते भक्तिरसः एकः पूर्णः स्वातन्त्रिकरसः। केचित् आलंकारिकाः एतां भक्तिं भावरूपेण अङ्गीकृतवन्तः। किन्तु अनेन भक्तिरसस्य पूर्णमर्यादा प्रदातुं न शक्यते। यतोहि तस्य स्थायीभावे सर्वाणि वैशिष्ट्यानि सन्ति, यानि इतरेषु रसेषु स्थातव्यान्येव। अतएव भक्तेः रससिद्धौ विमतानां निःसारः प्रकट्यते।

## तथ्यसूत्रम्–

१. नाट्यशास्त्रम्, ६/१६
२. काव्यालंकारः, पृ. – ६२
३. काव्यालंकारः, पृ. – १२७
४. काव्यालंकारसारसंग्रहः, ४/४, पृ. – ५२
५. शृङ्गारतिलकम्, १/९, पृ. – ६६
६. अभिनवभारती, पृ. – ६४०
७. रससंख्या - काव्यशास्त्रीयविश्लेषणम्
८. दशरूपकम्, ४/३५
९. रसतरङ्गिणी– ६/२
१०. रससंख्या - काव्यशास्त्रीयविश्लेषणम्, पृ. – १३३
११. काव्यालंकारः – १२/३
१२. साहित्यदर्पणम् – ३/२५१
१३. काव्यालंकारः, ३/५

## परिशीलितग्रन्थसूची –

१)विश्वेश्वरः, आचार्यः, अभिनवभारती, दिल्लीविश्वविद्यालयः, प्रथमसंस्करणम्।

२)दासः, सुरञ्जनः, रससिद्धान्त की शास्त्रीय समीक्षा, हंसा प्रकाशन, जयपुरम्, २०००।
३)मिश्रः, कृष्णगोपालः, रससिद्धान्त : आजतक, रचना प्रकाशन, जयपुरम्, २०१५
४)भक्तिवेदान्तस्वामीप्रभुपादअभयचरणारविन्दः, श्रीमद्भगवद्गीतायथायथ(२००६), भक्ति-वेदान्तवुक्ट्रास्ट्, श्रीमायापुर्, कलकाता।
५)अपूर्वानन्दस्वी, श्रीमद्भगवद्गीता(२०१०), उद्बोधनकार्यालयः, कलकाता।
६)चट्टोपाध्यायः श्रीअवनीभूषणः, श्रीमद्भगवद्(२०१०), भक्तिवेदान्तवुक्ट्रास्ट्, कलकाता।
७)त्रिपाठी राममूर्तिः, काव्यतत्त्वविमर्शः, कोनार्क् प्रकाशनम्, न्यू दिल्ली, १९६०।

❋ ❋ ❋